# Papamurtirproktam Shivavidyamahimavarnanam

# પાપમૂર્તિપ્રોક્તં શિવવિદ્યામહિમાવર્ણનમ્

## Document Information

Text title : Papamurtirproktam Shivavidyamahimavarnanam 2

File name : shivavidyAmahimAvarNanam2.itx

Category : shiva, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shivarahasyam | harAkhyaH tRitIyAMshaH | uttarArdham | adhyAyaH 6 | 87-101 ||

Latest update : January 30, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 1, 2024

*sanskritdocuments.org*

# પાપમૂર્તિર્પ્રોક્તં શિવવિદ્યામહિમાવર્ણનમ્

શૈવવિદ્યાદીક્ષિતોઽયં અત્ર તત્પાપસાધનમ્ ।
યસ્યાસ્તિ શૈવવિદ્યાયાં બુદ્ધિઃ સોઽપિ મહાન્ ખલુ ॥ ૮૭॥

તત્ર નિષ્ઠુરમુક્ત્વાન્તે નરકં યાતિ સર્વથા ।
અજ્ઞાનેન પ્રમાદાદ્વા પ્રસઙ્ગાદ્વા કદાચન ॥ ૮૮॥

શિવજ્ઞાનાન્વિતં દૃષ્ટ્વા ન નમેદ્યઃ સ પાપધીઃ ।
શૈવવિદ્યાદૂપકાનાં નરકે વસતિઃ ખલુ ॥ ૮૯॥

અતઃ પરં ત્વયાઽપ્યાશુ ગન્તવ્યં નરકે ધ્રુવમ્ ।
શૈવદીક્ષાપૂતદેહઃ પુણ્યપુઞ્જ ઇતિ સ્મૃતઃ ॥ ૯૦॥

તત્ર નિષ્ઠુરમુક્ત્વાઽન્તે યાન્ત્યેવ નરકં ધ્રુવમ્ ।
વિભૂતિધારણે ભક્તિઃ શઙ્કરે શાઙ્કરેઽપિ વા ॥ ૯૧॥

યસ્ય સ્યાત્ સ તુ મુક્તઃ સ્યાત્ અન્યસ્ય તુ ન સા ખલુ ।
ભસ્મધારણપૂતાત્મા યઃ પૂતઃ શિવવિદ્યયા ॥ ૯૨॥

સ એવ તાવદુષ્કૃષ્ટઃ તત્રેષ્ટં ચેષ્ટભાષણમ્ ।
શિવવિદ્યાદીક્ષિતેષુ વિનયેનાનુવર્તનમ્ ॥ ૯૩॥

સર્વપાપવિનાશાય સદ્ય એવ પ્રજાયતે ।
શિવવિદ્યામણિઃ કણ્ઠે યદા યસ્યાધિતિષ્ઠતિ ॥ ૯૪॥

તદા તદ્વશમાયાન્તિ સર્વે બ્રહ્માદયઃ સુરાઃ ।
કલ્પાન્તવહ્નિરૂપસ્ય બાલસ્યાસ્યાધુના મયા ॥ ૯૫॥

તેજો ન સહ્યતે સોઢું નિષ્ઠુરોક્તિસ્તુ દૂરતઃ ।
યસ્તુ સ્વાપેક્ષયા નીચઃ તત્ર નિષ્ઠુરભાષણમ્ ॥ ૯૬॥

કદાચિદુચિતં તત્રાપ્યુચિતં તત્ કથં સદા ।
સ્વાધીનાં રસનાં પ્રાપ્ય નિષ્ઠુરં યો વદિષ્યતિ ॥ ૯૭॥

સ નારકીતિ વિજ્ઞેયો યતસ્તત્ પાપસાધનમ્ ।
શિવનામોચ્ચારણાય સૃષ્ટા જિહ્વા વિશેષતઃ ॥ ૯૮॥

તતસ્તયા નિષ્ઠુરોક્તિઃ ન યુક્તા દેહિનાં ખલુ ।
મધુરાન્મધુરં મનોહરં સુકરં શઙ્કરનામ કેવલમ્ ।
વદતિ શ્રુતિભૂતિપાવનો મધુરાસ્વાદનલોલજિહ્વયા ॥ ૯૯॥

મધુરોક્તિભિરેવ તોષણં મધુરાલાપસુધારસજ્ઞયા ।
અનયા ખલુ જિહ્વયા મુહુઃ શિવનામામૃતપાનમીપ્સિતમ્ ॥ ૧૦૦॥

આરોગ્યં પરમાયુરુત્તમમતિઃ સૌભાગ્યવૃદ્ધિર્યશઃ
શ્રેયો રૂપમુદારતા રતિસુખં સન્તાનવૃદ્ધિર્મહઃ ।
કાન્તિઃ શૌર્યમપારશત્રુવિજયો વિદ્યાઽપિ સમ્પ્રાપ્યતે
નિત્યં શઙ્કરપૂજયા શિવમહાવિદ્યાવતા સર્વથા ॥ ૧૦૧॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે પાપમૂર્તિપ્રોક્તં શિવવિદ્યામહિમાવર્ણનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । હરાખ્યઃ તૃતીયાંશઃ । ઉત્તરાર્ધમ્ । અધ્યાયઃ ૬ -
નારદાત્ રાજબાલસ્ય શિવવિદ્યોપદેશમહિમવર્ણનમ્ । ૮૭-૧૦૧॥

- .. shrIshivarahasyam . harAkhyaH tRRitIyAMshaH . uttarArdham . adhyAyaH 6 -
nAradAt rAjabAlasya shivavidyopadeshamahimavarNanam . 87-101..

Proofread by Ruma Dewan

*Papamurtirproktam Shivavidyamahimavarnanam*
pdf was typeset on February 1, 2024

Please send corrections to *sanskrit@cheerful.com*